# नन्दनन्द श्रीकृष्णाष्टकम्

भजे व्रजैकमंडनं समस्तपापखण्डनं
स्वभक्तचित्तरंजनं सदैव नन्दनन्दनम्।
सुपिच्छगुच्छ-मस्तकं सुनादवेणुहस्तकं
अनंगरंगसागरं नमामि कृष्ण-नागरम्॥ १॥

मनोज-गर्वमोचनं विशाल-लोल-लोचनं
विधूतगोपशोचनं नमामि पद्मलोचनम्।
करारविन्दभूवरं स्मितावलोकसुन्दरं
महेन्द्रमानदारणं नमामि कृष्णवारणम्॥ २॥

कदंबसूनकुण्डलं सचारुगण्डमण्डलं
व्रजांगनैकवल्लभं नमामि कृष्ण-दुर्लभम्।
यशोदया समोदया सगोपया सनन्दया
युतं सुखैकदायकं नमामि गोपनायकम्॥ ३॥

सदैव पादपंकजं मदीयमानसे निजं
दधानमुत्तमालकं नमामि नन्दबालकम्।
समस्तदोष-शोषणं समस्तलोकपोषणं
समस्तगोप-मानसं नमामि कृष्णलालसम्॥ ४॥

भुवो भरावतारकं भवाब्धिकर्णधारकं
यशोमती-किशोरकं नमामि दुग्धचोरकम्।
दृगन्तकान्तभंगिनं सदासदालसंगिनं
दिनेदिने नवं नवं नमामि नन्दसंभवम्॥ ५॥

गुणाकरं सुखाकरं कृपाकरं कृपावरं
सुरद्विष-न्निकन्दनं नमामि गोपनन्दनम्।
नवीनगोपनागरं नवीनकेलि-लंपटं
नमामि मेघसुन्दरं तडित्प्रभालसत्पटम्॥ ६॥

समस्तगोपनन्दनं हृदंबुजैकमोहनं
नमामि कुंजमध्यगं प्रसन्नभानुशोभनम्।
निकाम-कामदायकं दृगन्तचारु-सायकं
रसालवेणु-गायकं नमामि कुंजनायकम्॥ ७॥

विदग्ध-गोपिका-मनो-मनोज्ञतल्प-शायिनं
नमामि कुंजकानने प्रवृद्ध-वह्नि-पायिनम्।
यदा तदा यथा तथा तथैव कृष्णसत्कथा
मया सदैव गीयतां तथा कृपा विधीयताम्।
प्रमाणिकाष्टकद्वयं जपत्यधीत्य यः पुमान्
भवेत् स नन्दनन्दने भवे भवे सुभक्तिमान्॥ ८॥

॥ इति श्रीशंकराचार्यविरचितं श्रीकृष्णाष्टकं ॥

**********


| HOME | STOTRA LIST | PREVIOUS ARCHIVE | NEXT ARCHIVE |
|---|---|---|---|

Hosted by tripod